संस्कृतवार्ताः

दिनाङ्क : 08/02/2026 सायम् - 06:20

**आदौ मुख्यवार्ता:**

- अद्य कुआलालंपुर-नगरे मलेशिया-देशस्य समकक्षीयेण अन्वर इब्राहिम इत्यनेन सह विस्तृतस्य वार्तालापस्य अनन्तरं प्रधानमन्त्रिणा नरेन्द्रमोदिना आतङ्कवादस्य विषये भारतस्य दृढस्थितिं पुनरुच्चारितम्।
- भारत-मलेशिया-देशयोः मध्ये रक्षा-सुरक्षा, सेमीकंडक्टर, स्वास्थ्य आदि अनेकाषाम् अभिलेखानां सन्धि पत्राणां च आदानप्रदानम् अभवत्।
- केन्द्रीय-गृह-मन्त्री अमितशाहः रायपुरे नक्सल्-विरोधी-कार्याणां विविधविकासकार्याणां च समीक्षार्थं द्वे उच्च-स्तरीय-सभे अयोजिते।
- केन्द्रीयकृषिमन्त्री शिवराज् सिङ्घ् चौहानः अद्य अवधानं दत्तवान् यत् भारत-अमेरिका-अन्तरीम-व्यापार-सन्धिः कृषकाणां हितस्य पूर्णतया रक्षणं करोति।
- बाङ्ग्लादेशस्य पूर्वजलसंसाधनमन्त्री तथा आवामी-लीग् इत्यस्य वरिष्ठः नेता रमेशचन्द्रसेनः दिनाजपुर-मण्डल-कारागारे अभिरक्षायां मृतः।
- शूटिङ्ग्-क्रीडायां भारतस्य अर्जुन बाबूता तथा एलावेनिल वलारिवन इत्युभौ अद्य नवदिल्ली-नगरे षड्विंशत्यधिक द्विसहस्रतम वर्षस्य एशियन् रायफल/पिस्टल्-चैम्पियन्शिप् स्पर्धायां स्वर्णपदकं प्राप्तवन्तौ विश्व-किर्तिमतं च स्थापितवन्तौ।

**प्रधानमन्त्री-मलेशिया**

प्रधानमन्त्रिणा नरेन्द्रमोदिना आतङ्कवादस्य विषये भारतस्य दृढस्थितिं पुनरुच्चारितम्। अद्य कुआलालंपुर-नगरे मलेशिया-देशस्य समकक्षीयेण अन्वर इब्राहिम इत्यनेन सह विस्तृतं वार्तालापस्य अनन्तरं संयुक्त-वार्ताहरसम्मेलने श्रीमोदी उक्तवान्।

भारत-मलेशिया-देशयोः मध्ये आतङ्कवादावरोधः, गुप्तसूचनानाम् आदान-प्रदानम्, समुद्रीयसुरक्षायाः, रक्षायाः च क्षेत्रेषु सहयोगस्य विस्तारः भविष्यति इति श्रीमोदी अवधानं प्रदत्तवान्।

प्रधानमंत्रीः अवदत् यत् भारत-मलेशिया-देशयोः मध्ये समुद्रीय-प्रतिवेशिनां रूपेण विशेष-सबन्धः अस्ति, अपि च मलेशिया-देशे भारतीय-प्रवासिनाम् उपस्थितिः, जनेषु दृढसम्बन्धः च अस्ति इति। प्रधानमन्त्री अवदत् यत्, उभौ देशौ आसियान् इत्यनेन सह सम्पूर्णे क्षेत्रे विकासाय, शान्त्यर्थं, स्थिरतायै च प्रतिबद्धौ स्तः।

मलेशिया-देशस्य तमिळ्-भाषया सह द्वयोः राष्ट्रयोः मध्ये दृढ-सांस्कृतिक-शैक्षणिक-सम्बन्धस्य विषये प्रधानमन्त्री अवदत्। प्रधानमन्त्रिणः मोदिनः मलेशिया-देशस्य समकक्षीयेण सह वार्तालापः रक्षा-सुरक्षा-सम्बन्धान् सुदृढं कर्तुं, आर्थिक-नवान्वेषण-सहभागितां वर्धयितुं च केन्द्रितः आसीत्। भारत-मलेशिया-देशयोः मध्ये अनेकाषाम् अभिलेखानां सन्धि पत्राणां च आदानप्रदानम् अभवत्।

तत् पश्चात्, प्रधानमन्त्री मोदी द्वयोः देशयोः मध्ये व्यापारस्य, निवेशस्य, आर्थिक-सम्बन्धस्य च सुदृढीकरणाय मुख्यकार्यकारी-अधिकारिभिः, व्यापारनेतृभिः च सह वार्तालापम् अकरोत्।

गृहमन्त्री-रायपुरे

केन्द्रीय-गृह-मन्त्री अमितशाहः अद्य छत्तीसगढस्य राजधान्यां रायपुरे नक्सल्-विरोधी-कार्याणां विविधविकासकार्याणां च समीक्षार्थं द्वे उच्च-स्तरीय-सभे अयोजिते। सामाजिकपटले प्रकाशिते सन्देशे केन्द्रीय-गृहमन्त्री अवदत् यत्, सुरक्षा-केन्द्रीत कार्यनीतिः, मूलसौकर्याणां प्राप्तिः, नकसल-वित्तीय-जालानां दमनम्, समर्पण-नीतिः च सकारात्मक-परिणामाः प्राप्ताः सन्ति। श्रीशाहः पुनः उक्तवान् यत् अस्मिन् वर्षे मार्च्-मासस्य एकत्रिंशत् दिनाङ्कात् पूर्वं नक्सलवादस्य पूर्णतया निर्मूलनं भविष्यति इति।

श्रीशाहः अवदत् यत्, कदाचित् नक्सल्-हिंसायाः दुर्गः आसीत् छत्तीसगढः, इदानीं भाजपेति दलस्य डबल-इंजन प्रशासनस्य नेतृत्वे विकासस्य प्रतीकः अभवत्।

शिवराज-यू एस्

केन्द्रीयकृषिमन्त्री शिवराज् सिङ्घ् चौहानः अद्य अवधानं दत्तवान् यत् भारत-अमेरिका-अन्तरीम-व्यापार-सन्धिः कृषकाणां हितस्य पूर्णतया रक्षणं करोति, प्रमुखाः कृषि-उत्पादाः अपि अनुबन्धात् बहिः स्थापिताः सन्ति इति। मन्त्री भोपाल्-नगरे वार्ताहरान् सम्बोधयन् आसीत्। श्रीचौहानः अवदत् यत् भारतीय-कृषकाणां हिताय हानिकरं किमपि उत्पादं समाविष्टं नास्ति इति, राष्ट्रस्य कृषकाणां च हितं सर्वोपरि अस्ति इति आश्वासितवान् ।

महाराष्ट्र सेशेल्स

महाराष्ट्रस्य मुख्यमन्त्री देवेन्द्र फडनवीसः अद्य मुम्बई-नगरे सेशेल्स-देशस्य राष्ट्रपतिना डा. पैट्रिक हरमिनी इत्यनेन सह मिलित्वा विविधेषु विषयेषु वार्तालापं कृतवान्। सामाजिकान्तर्जालीये सन्देशे श्रीफडणवीसः अवदत् यत् चर्चित-विषयेषु पत्तन-नेतृत्व-विकासः, तटीयप्रबन्धनं, महाराष्ट्र-सेशेल्स्-देशयोः मध्ये वर्धितसहयोगस्य अवसरानि च अन्तर्भवन्ति इति।

सेशेल्स्-राष्ट्रपतिः

सेशेल्स्-देशस्य राष्ट्रपतिः पैट्रिक् हरमिनी, चेन्नई-मुम्बई-नगरयोः अनन्तरं नवदिल्ली-नगरं सम्प्राप्तवान्।

इन्दिरा-गान्धी-अन्ताराष्ट्रिय-विमानस्थानके स्वास्थ्य-परिवार-कल्याण-राज्य-मन्त्री अनुप्रिया-पटेल इत्येषा राष्ट्रपतेः हरमिनी वर्यस्य स्वागतं कृतवती।

राष्ट्रपतिः पैट्रिक् हरमिनी वर्यः पञ्चदिवसीय आधिकारिकयात्रायां, भारत-सेशेल्स-राजनैतिक-सम्बन्धानां स्वर्णजयन्ती-महोत्सवे अस्ति।

**भारतअसम-कांग्रेस-गोगोई**

असम-सर्वकारेण काङ्ग्रेस्-सदस्यस्य तथा राज्यकाङ्ग्रेस्-प्रमुखस्य गौरवगोगोई इत्यस्य पाकिस्तानेन सम्बन्धस्य प्रकरणं गृहमन्त्रालयं प्रति प्रेषितुं निर्णयः कृतः अस्ति। अद्य गुवाहाटी-नगरे वार्ताहर-सम्मेलनं सम्बोधयन् मुख्यमन्त्री हिमान्ता-बिस्वा-सरमा-वर्यः स्पष्टीकृतवान् यत् राष्ट्रियसुरक्षा-दृष्ट्या अन्वेषणं दृढतया क्रियते, राजनैतिक-विचाराः गौणानि सन्ति इति। श्रीसरमा वर्यः सूचितवान् यत् गौरव गोगोई तथा तस्य ब्रिटिश्- पत्न्या सह पाकिस्तानस्य नागरिकेन कथितस्य भारत-विरुद्ध-षड्यन्त्रस्य अन्वेषणार्थं राज्यसर्वकारेण विशेष-अन्वेषण-दलस्य (एस. आई. टी. इति) निर्मितम् अस्ति। सः अवदत् यत् विषयस्य गम्भीरताम् अवलम्ब्य, राज्यसर्वकारेण प्रकरणं केन्द्रीय-गृह-मन्त्रालयाय समर्पयितुं निर्णयः कृतः अस्ति। अत्रान्तरे, काङ्ग्रेस्-दलस्य नेता गौरव गोगोई , यः लोकसभायां दलस्य उपनेता अपि अस्ति, सः आरोपान् निराकृतवान्।

**सूरजकुण्ड-मेलायां**

सूरजकुण्ड-मेलायां दोला-पतन-दुर्घटनायां सर्वेषां पीडितानां चिकित्सा-व्ययस्य पोषणं हरियाणा-प्रशासनं करिष्यति। फरीदाबादे वार्ताहरैः सह वार्तालापं कुर्वन् हरियाणा-पर्यटन-निगम-लिमिटेड इत्यस्य प्रबन्धनिदेशकः पार्थगुप्ता अवदत् यत् ह्यः सायं सपादषट् वादने दुर्घटना अभवत्। कर्तव्ये स्थितः उद्धारकार्ये संलग्नः आरक्षी-निरीक्षकः प्राणत्यागं कृतवान्। श्रीगुप्ता अवदत् यत् अम्यूसमेण्ट्-पार्क इति तत्क्षणप्रभावेन पिहितम्। श्री गुप्ता अवदत् यत् अस्याः घटनायाः अन्वेषणार्थं अपर-उपायुक्त-स्तरीय-समितिः निर्मिता अस्ति।

**बंगलादेश-रमेशचन्द्रसेनः**

बाङ्ग्लादेशस्य पूर्वजलसंसाधनमन्त्री तथा आवामी-लीग् इत्यस्य वरिष्ठः नेता रमेशचन्द्रसेनः दिनाजपुर-मण्डल-कारागारे अभिरक्षायां मृतः। सः पञ्चाशीति वर्षीयः आसीत्। कारागृहस्य अधिकारिणा उक्तं यत् कारागारस्य आभ्यन्तरे आवामी-लीग् दलस्य नेतायाः स्वास्थ्यं क्षीणं जातं, पश्चात् सः दिनाजपुर-चिकित्सा-महाविद्यालय-चिकित्सालये नीतः, यत्र सः मृतः इति घोषितः।

**ऋतु-विभागः**

भारत-ऋतु-विभागेन श्वः यावत् उत्तराखण्ड्-प्रदेशस्य पृथक्-पृथक् स्थानेषु प्रातः रात्रौ च सघन-निहाराच्छादनस्य पूर्वानुमानं कृतम् अस्ति।

आई. एम्. डी. इत्यस्य अनुसारं, जम्मू-कश्मीर, लद्दाख, हिमाचलप्रदेश, उत्तराखण्ड इत्येतेषु प्रदेशेषु श्वः आरभ्य अस्य मासस्य एकादश दिनाङ्कपर्यन्तं पृथक् पृथक् स्थानेषु वर्षायाः हिमपातस्य च सम्भावना अस्ति। आगामि दिनद्वयोः देशस्य वायव्यभागेषु न्यूनतम-तापमाने क्रमेण द्वि-डिग्री सेल्सियस् पर्यन्तं वृद्धिः भविष्यति इति विभागेन उक्तम्।

**शूटिङ्ग्-क्रीडायां**

शूटिङ्ग्-क्रीडायां भारतस्य अर्जुन बाबूता तथा एलावेनिल वलारिवन इत्युभौ अद्य नवदिल्ली-नगरे षड्विंशत्यधिक द्विसहस्रतम वर्षस्य एशियन् रायफल/पिस्टल्-चैम्पियन्शिप् स्पर्धायां दश मीटर्-एयर-रायफ़ल-मिश्र-दल-स्पर्धायां स्वर्णपदकं प्राप्तवन्तौ विश्व-किर्तिमतं च स्थापितवन्तौ।

॥ इति वार्ता: ॥